e- Book

**मुकुन्दः।**

पुं०। विष्णुः। तस्य व्युत्पत्तिर्यथा—

‘‘मुकुव्ययमान्तञ्च निर्वाणमोक्षवाचकम्।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्तितः॥
मुकुं भक्ति रसप्रेमवचनं वेदसम्मतम्।
यस्तद्ददाति विप्रेयो मुकुन्दस्तेन कीर्तितः॥’’

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥

निधिविशेषः। (यथा। मार्कण्डेय॥ ६८।५।

‘‘यत्र पद्ममहापद्मौ तथा मकरकच्छपौ।
मुकुन्दी नन्दकश्चैव नीलः शङ्खोऽष्टमी निधिः॥’’

अस्य गुणादिकं निधिशब्दे उक्त म्।) रत्नभेदः।

कुन्दूरः। इति मेदिनी। दे। ३८॥ (यथा च पर्यायः।

‘‘कुन्दूरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि।’’

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भाग॥।)

पुं०। (मोचयति विषयान्तरानुरागमिति। अन्तर्भूतण्यर्थ मुच्+कः। न्यङ्कादित्वात् कुत्वम्। तं उन्दत्यार्द्रीकरोतीति। उन्द+उण्। पृषोदरादित्वात् साधुः।) कुन्दूरुः। इत्यमरटीकायां मथुरानाथः॥